CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पशूँस्ताँश्चचक्क्रे व्वायव्व्यानारण्ण्याग्ग्राम्म्या श्च्च्ये ॥ ६ ॥
तस्माद्यज्ञात्सर्व्वहुत ऽऋचः सामानिजज्ञिरे ॥ छन्दाᳯंसिजज्ञिरे
तस्म्माद्यजुस्त स्म्मादजायत ॥ ७ ॥ तस्म्मादश्श्वा ऽअजायन्त
येकेचोभयादतः ॥ गावोहजज्ञिरेतस्म्मात्तस्म्मा ज्जाता ऽअजावयः
॥ ८ ॥ तंय्यज्ञम्बर्हिषि प्प्रौक्षन्पुरुषञ्जातमग्ग्रतः ॥ तेनदेवा ऽ
अयजन्त साद्ध्या ऽऋषयश्च्च्ये ॥ ९ ॥ यत्पुरुषं व्व्यदधुः
कतिधाव्व्यकल्प्पयन् ॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादा
ऽउच्च्येते ॥ १० ॥ ब्ब्राह्मणो ऽस्य मुखमासीद्बाहू राजन्न्यः कृतः ॥
ऊरूतदस्य यद्द्वैश्यः पद्भ्याᳯं शूद्द्रो ऽअजायत ॥ ११ ॥
चन्द्रमामनसोजा तश्च्चक्षोः सूर्य्यो ऽअजायत ॥ श्श्रोत्राद्वायुश्च्च
प्प्राणश्च्चमुखादग्निरजायत ॥ १२ ॥ नाब्भ्या ऽआसीदन्तरिक्षः
शीर्ष्णोद्यौः समवर्त्तत ॥ पद्भ्याम्भूमिर्दिशः श्श्रोत्रात्तथालोकाँ२ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऽअंकल्प्पयन् ॥ १३ ॥यत्पुरुषेणहविषा देवायज्ञमतंन्वत ॥
व्वसन्तोऽस्यासी दाज्ज्यंङ्ग्रीष्मऽइद्ध्मःशरद्धविः ॥ १४ ॥
सप्तास्यांसन्परिधयस्त्रिःसप्तसमिधं÷कृताः ॥ देवायद्यज्ञन्तंन्वाना
ऽअबंद्धन्पुरुंषम्पशुम् ॥ १५ ॥यज्ञेनंयज्ञमंयजन्तदेवास्तानि
धर्म्माणि प्प्रथमान्न्यांसन् ॥ तेहनाकंम्महिमानं÷सचन्तयत्रपूर्व्वे
साद्ध्याःसन्तिदेवाः ॥ १६ ॥ अद्भ्यःसम्भृंतंः पृथिव्व्यैरसांच्च
व्विश्श्वकंर्म्मणः समंवर्त्ततागग्रे ॥ तस्यत्त्वष्टांव्विदधंद्रूपमे
तितन्मर्त्यस्यदेवत्वमाजानमग्ग्रे ॥ १७ ॥ व्वेदाहमेतम्पुरुंष
म्महान्तंमादित्यवंर्ण्णन्तमंसःपरस्तांत् ॥ तमेवव्विंदित्त्वातिंमृत्यु
मेतिनान्न्यःपन्थांव्विद्यतेऽयंनाय ॥१८ ॥ प्प्रजापंतिश्च्चरति
गर्ब्भेंऽअन्तरजांयमानोबहुधाव्विजांयते ॥ तस्ययोनिम्पंरिपश्यन्ति
धीरास्तस्मिंन्हतस्त्थुर्ब्भुवंनानिव्विश्श्वां ॥ १९ ॥ योदेवेब्भ्यं

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ऽआतपंतिषोदेवानाम्पुरोहितः ॥ पूर्व्वो षोदेवेब्भ्योजातोनमो रुचायब्राह्मये ॥ २० ॥ रुचम्ब्राह्मञ्जनयन्तोदेवाऽअग्ग्रेतदंब्रुवन् ॥ षस्त्वैवंब्राह्मणोविद्यात्तस्यदेवाऽअंसन्वशे ॥ २१ ॥ श्रीश्च्चते लक्ष्मी श्च्चपत्न्यावहोरात्रे पार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ॥ इष्णन्निषाणामुम्मंऽइषाणसर्व्वलोकम्मंऽइषाण ॥ २२ ॥

इति रुद्रे द्वितीयोऽध्याय ॥ २ ॥

अथ तृतीयोऽध्यायः

हरिः ॐ आशुःशिशानोव्वृषभोनभीमोघनाघनःक्षोभण श्च्चार्षणीनाम् ॥ सङ्क्रन्दनोनिमिषऽएकवीरःशतꣳसेनाऽ अजयत्साकमिन्द्रः ॥ १ ॥ सङ्क्रन्दनेनानिमिषेणजिष्णुनायुत्त्कारेण दुश्च्च्यवनेनधृष्णुना ॥ तदिन्द्रेणजयततत्सहद्ध्वंयुधो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नरऽइषुहस्तेनवृष्ष्णा ॥ २ ॥ सऽइषुहस्तैः सनिषङ्गिभिर्व्वशीसᳪ
स्त्रंष्ट्टासयुधऽइन्द्रोगणेन ॥ सᳪ सृष्ट्टजित्सोमपाबाहुशर्द्धर्युं
ग्ग्रधन्न्वाप्प्रतिंहिताभिरस्ता ॥ ३ ॥ बृहस्प्पतेपरिदीयारथेनर
क्षोहामित्राँ२ ॥ ऽअपबाधमानः ॥ प्प्रभञ्जन्त्सेनाः प्प्रमृणोयुधा
जयन्नस्म्माकमेद्ध्यविताथानाम् ॥ ४ ॥ बलविज्ञायस्स्थविरः
प्प्रवीरः सहस्वान्वाजीसहमानऽउग्ग्रः ॥ अभिवीरोऽअभिसंत्त्वा
सहोजाजैत्रमिन्द्ररथमातिष्ठगोवित् ॥ ५ ॥ गोत्रभिदङ्गो
विदंव्वज्ज्रबाहुञ्जयन्तमज्ज्मप्प्रमृणन्तमोजसा ॥ इमᳪ सजाताऽ
अनुवीर यद्ध्वमिन्द्रᳪ सखायोऽअनुसᳪ रभद्ध्वम् ॥ ६ ॥
अभिगोत्राणिसहसागाहमानोदयोव्वीरः शतमन्न्युरिन्द्रः ॥
दुश्च्व्यवनः पृतनाषाड युद्ध्योऽस्माकᳪ सेनाऽअवतुप्प्रयुत्सु ॥ ७ ॥
इन्द्रऽआसान्नेताबृहस्प्पतिर्द्दक्षिणायज्ञः पुरऽएतुसोमः ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोषन्त्वग्ग्रम् ॥ ८ ॥
इन्द्रस्य व्वृष्ष्णो व्वरुणस्य राज्ञऽआदित्या-नाम्मरुताᳫं
शर्द्धऽउग्ग्रम् ॥ महामनसाम्भुवनच्च्यवानाङ्घोषोदेवानाञ्जयन्ता
मुदस्थात् ॥ ९ ॥ उद्धर्षयमघवन्नायुधान्युत्सत्त्वं नाम्मामका-
नाम्मनाᳫंसि ॥ उद्वृत्रहन्वाजिनांव्वाजि-नान्युद्रथानाञ्जय
तांऽषन्तुघोषाः ॥ १० ॥ अस्म्माकमिन्द्रः समृतेषुद्ध्वजे
ष्ष्वस्म्माकंऽषाऽइषवस्ताजयन्तु ॥ अस्म्माकंव्वीराऽउत्तरे
भवन्त्वस्म्माँ२ऽउदेवाऽअवताहवेषु ॥ ११ ॥ अमीषाञ्चित्तम्प्रति
लोभयन्तीगृहाणाङ्गान्न्यप्वे परेहि ॥ अभिप्प्रेहिनिर्दहहृत्सुशोकैरन्धेना
मित्त्रास्तमसासचन्ताम् ॥ १२ ॥ अवसृष्टापरापतशरव्व्ये
ब्ब्रह्मसᳲशिते ॥ गच्छामित्त्रान्प्प्रपद्यस्वमामीषाङ्कञ्चनोच्छिषः
॥ १३ ॥ प्रेता जयतानरऽइन्द्रोवः शर्म्मषच्छतु ॥ उग्ग्रावः सन्तु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
बाहवोनाधृष्ष्याथथासथ ॥ १४ ॥ असौयासेना मरुतः परेषामब्भ्यै
तिनऽओजसास्प्पर्द्धमाना ॥ ताङ्गूहततमसापव्व्रतेनयथामीऽअन्न्यो
ऽअन्न्यन्नजानन् ॥ १५ ॥ यत्रबाणाः सम्प्पतन्ति कुमाराव्विशिखाऽ
इव ॥ तन्नऽइन्द्रो बृहस्प्पतिरदितिः शर्म्मयच्छतु व्विश्श्वा
हाशर्म्मयच्छतु ॥ १६ ॥ मर्म्माणितेव्वर्म्मणाच्छादयामि सोमस्त्वा
राजामृतेनानुवस्ताम् ॥ उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वा
नुदेवामदन्तु ॥ १७ ॥

इति रुद्रे तृतीयोऽध्यायः ॥ ३ ॥

अथ चतुर्थोऽध्यायः

हरिः ॐ व्विब्भ्राड्बृहत्पिबतुसोम्म्यम्मध्वायुर्द्दधद्यज्ञपता
वविहुतम् ॥ व्वातजूतोयो ऽअभिरक्षतित्मनाप्प्रजाः पुपोषपुरुधाव्वि
राजति ॥ १ ॥ उदुत्यञ्जातवेदसन्देवंव्वहन्ति केतवः ॥ दृशेव्विश्श्वाय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सूर्य्यम् ॥ २ ॥ येनापावकचक्षसाभुरण्यन्तञ्जनाँ२ ॥ऽअनु ॥
त्वंव्वरुणपश्यसि ॥ ३ ॥ दैव्यावद्ध्वर्यूऽआगतᳬरथेन
सूर्य्यत्वचा ॥ मद्ध्वायज्ञᳬसमञ्जाथे ॥तम्प्रत्क्नथाऽयंव्वेनश्चित्त्र
न्देवानाम् ॥ ४ ॥तम्प्रत्क्नथापूर्व्वथाविश्श्वथेमथाज्ज्येष्ठतां
तिम्बर्हिषदᳬस्वर्व्विदम् ॥ प्प्रतीचीनंव्वृजनन्दोहसेधुनिमाशुञ्जयन्त
मनुयासुव्वर्द्धसे ॥ ५ ॥ अयंव्वेनश्चोदयत्पृश्निगर्ब्भाज्ज्योतिर्ज्जरायू
रजसोव्विमाने ॥ इममपाᳬसङ्गमेसूर्य्यस्यशिशुन्नव्विप्प्रामतिभी
रिहन्ति ॥ ६ ॥ चित्त्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्त्रस्य
व्वरुणस्याग्ग्नेः ॥ आप्प्राद्यावापृथिवीऽअन्तरिक्षᳬसूर्य्यऽ
आत्त्माजगतस्तस्थुषश्च ॥ ७ ॥आनऽइडाभिर्व्विदथेसुशस्ति
व्विश्वानरᳬसविता देवऽएतु ॥ अपियथायुवानोमत्सथानो
व्विश्वञ्जगदभिपित्त्वेमनीषा ॥ ८ ॥ यदद्यकच्चव्वृत्रहन्नुदगाऽ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अभिसूर्य्य ॥सर्व्वन्तादिन्द्रते व्वशे ॥९ ॥तरणिर्व्विश्वदर्शतो
ज्योतिष्कृदसिसूर्य्य ॥ व्विश्वमाभासिरोचनम् ॥ १० ॥ तत्सूर्य्यस्य
देवत्वन्तन्महित्वम्मद्धयाकर्त्तोर्व्विततꣳ सञ्जभार ॥
यदेदयुक्तहरितः सधस्थादाद्रात्रीव्वासस्तनुतेसिमस्मै ॥ ११ ॥
तन्मित्रस्य व्वरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्योरुपस्थे ॥
अनन्तमन्न्यद्रुशदस्यपाजः कृष्णमन्न्यद्धरितꣳ सम्भरन्ति ॥ १२ ॥
बण्णमहाँ२ ॥ ऽअसिसूर्य्य बडादित्त्य महाँ२ ॥ऽअसि ॥
महस्तेसतोमहिमापनस्यतेद्धादेवमहाँ२ ॥ ऽअसि ॥ १३ ॥
बट्सूर्य्यश्रवसामहाँ२ ॥ऽ असिसत्रादेवमहाँ२ ॥ऽअसि ॥
मह्नादेवानामसुर्य्यः पुरोहितोव्विभुज्ज्योतिरदाब्भ्यम् ॥ १४ ॥
श्रायन्तऽइवसूर्य्यं व्विश्वेदिन्द्रस्यभक्षत ॥व्वसूनिजाते
जनमानऽओजसाप्प्रतिभागन्नदीधिम ॥१५ ॥ अद्यादेवाऽ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उदिंतासूर्र्व्वं-स्यनिरंहसंपिपृता निरवद्यात् ॥ तन्नोंमित्रो व्वरुणोमामहन्तामदितिंसिन्धुः पृथिवीऽउतद्यौः ॥१६॥ आकृष्णेनरजंसाव्वर्त्तं मानोनिवेशयंन्नमृतम्मर्त्यंञ्च ॥हिरण्ययेन सवितारथेनादेवोयांतिभुवंनानिपश्यंन् ॥ १७ ॥

इति रुद्रे चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः

हरिःॐ नमंस्तेरुद्रमन्यवंऽउतोतऽइषंवेनमंः ॥ बाहुभ्यां मुततेनमंः ॥ १ ॥ यातेंरुद्रशिवातनूरघोराऽपांपकाशिनी ॥ तयांनस्तन्वाशन्तंमयागिरिंशन्ताभिचांकशीहि ॥ २ ॥ यामिषुं ङ्गिरिशन्तहस्तेंबिभर्ष्यस्तंवे ॥ शिवाङ्गिंरित्रताङ्कुरुमाहिंसीः पुरुषञ्जगंत् ॥ ३ ॥ शिवेनव्वचंसात्त्वागिरि शाच्छांव्वदामसि ॥ यथांनःसर्व्वमिज्जगं दयक्ष्मंसुमनाऽअसंत् ॥ ४ ॥ अद्ध्यंवोच

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दधिवक्ताप्प्रथमोदैव्व्योभिषक् ॥ अहीँश्च्चसर्व्वाञ्जम्भयन्त्सर्व्वा
श्च्चयातुधान्न्योऽधराचीः परासुव ॥ ५ ॥असौयस्ताम्म्रोऽअरुणऽ
उत बब्भ्रुःसुमङ्गलः ॥ येचैनꣳरुद्द्राऽअभितोदिक्षुश्श्रिताः
सहस्त्रशोऽवैषाꣳ हेडऽईमहे ॥ ६ ॥ असौयोऽवसर्प्पतिनीलग्ग्रीवो
विलोहितः ॥ उतैनं ङ्गोपाऽअदृश्श्रन्नदृश्श्रन्नुदहार्य्यः सदृष्टोमृड
यातिनः ॥ ७ ॥ नमोऽस्तुनीलग्ग्रीवायसहस्त्राक्षायमीढुषे ॥
अथोयेऽअंस्यसत्त्वानोऽहन्तेब्भ्योऽकरन्नमः ॥ ८ ॥ प्प्रमुञ्च
धन्न्वनस्त्वमु-भयोरार्त्न्योर्ज्ज्याम् ॥ याश्च्चतेहस्तऽ इषवः पराता
भगवोव्वप ॥ ९ ॥ विज्ज्यन्धनुःकपर्द्दिनो विशल्ल्योबाणवाँ२ ॥
ऽउत ॥ अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ १० ॥
यातेहेतिर्म्मीढुष्ट्टमहस्तेबभूवतेधनुः ॥ तयास्म्मान्विश्श्वत
स्त्वमयक्ष्म्मयापरि भुज ॥ ११ ॥ परितेधन्न्वनोहेतिरस्म्मान्वृणक्तु

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विश्वतं÷ ॥ अथोषऽइ षुधिस्तवारेऽअस्म्मन्निधे हितम् ॥ १२ ॥
अवतत्त्यधनुष्ट्वᳫंसहस्त्रा क्षशतेषुधे ॥ निशीर्ष्यशल्ल्यानाम्मुखा
शिवोनं÷सुमनाभव ॥ १३ ॥ नमंस्तऽआयु धायानाततायधृष्ष्णवे ॥
उभाब्भ्यामुततेनमो बाहुब्भ्यान्तवधन्न्वने ॥ १४ ॥ मानोमहान्तं
मुतमानो ऽअब्भर्कम्मान्ऽउक्षन्तमुतमानंऽ उक्षितम् ॥
मानोव्वधीᳫं पितरम्मोतमातरम्मानं÷प्प्रियास्तन्न्वोरुद्द्र
रीरिषᳫं ॥ १५ ॥ मानंस्तोकेतनयेमान्ऽआयुंषिमानोगोषुमानोऽ
अश्श्वेषु रीरिषᳫं ॥ मानोव्वीरान्नुद्द्रभामिनोव्वधीर्हविष्मन्तᳫं
सदमित्त्वाहवामहे ॥ १६ ॥ नमोहिरंण्णयबाहवेसेनान्न्येदिशाञ्चपतये
नमोनमोव्वृक्षेब्भ्योहरिकेशेब्भ्यᳫं पशूनाम्पतयेनमोनमं÷
शष्प्पिञ्जरायत्त्विषीमते पथीनाम्पतयेनमोनमोहरिकेशायोपवीतिने
पुष्टानाम्पतयेनमोनमोबब्भ्लुशाय ॥ १७ ॥ नमोबब्भ्लुशाय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

व्याधिनेऽन्नानाम्पतयेनमोनमोभवस्यहेत्यैजगताम्पतयेनमोनमो
रुद्रायाततायिनेक्षेत्राणाम्पतयेनमोनमः सूतायाहन्त्यैव्वना
नाम्पतयेनमोनमोरोहिताय ॥ १८ ॥ नमोरोहितायस्थपतये
वृक्षाणाम्पतयेनमोनमोभुवन्तयेव्वारिवस्कृतायौषधीनाम्पतये
नमोनमो मन्त्रिणेव्वाणिजायकक्षाणाम्पतयेनमोनमऽउच्चैर्घो
षायाक्रन्दयतेपत्तीनाम्पतयेनमोनमः कृत्स्नायतया ॥ १९ ॥
नमःकृत्स्नायतयाधावतेसत्त्वनाम्पतयेनमोनमꣳसहमानाय
निव्व्याधिन ऽआव्व्याधिनीनाम्पतयेनमोनमोनिषङ्गिणे
ककुभायस्तेनानाम्पतयेनमोनमोनिचेरवेपरिचरायारण्यानाम्पत
येनमोनमोव्वञ्चते ॥ २० ॥ नमोव्वञ्चतेपरिवञ्चतेस्तायूनाम्पत
येनमोनमोनिषङ्गिणऽइषुधिमतेतस्कराणाम्पतयेनमोनमः
सृकायिब्भ्योजिघांꣳसद्ब्भ्योमुष्णताम्पतयेनमोनमोऽसिमद्ब्भ्यो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नक्तञ्चरद्भ्यो विकृन्तानाम्पतये नमः ॥ २१ ॥
नमऽउष्णीषिणे गिरिचराय कुलुञ्चानाम्पतये नमो नमऽइषुमद्भ्यो
धन्वायिभ्यश्च वो नमो नमऽआतन्वानेभ्यः प्रतिदधानेभ्य
श्च वो नमो नमऽआयच्छद्भ्योऽस्यद्भ्यश्च वो नमो नमो
विसृजद्भ्यः ॥ २२ ॥ नमो विसृजद्भ्यो विध्यद्भ्य
श्च वो नमो नमः स्वपद्भ्यो जाग्रद्भ्यश्च वो नमो नमꣳ
शयानेभ्यऽआसीनेभ्यश्च वो नमो नमस्तिष्ठद्भ्यो धावद्
भ्यश्च वो नमो नमः सभाभ्यः ॥ २३ ॥ नमः सभाभ्यः
सभापतिभ्यश्च वो नमो नमोऽश्वेभ्योऽश्वपतिभ्यश्च वो
नमो नमऽआव्याधिनीभ्यो विविध्यन्तीभ्यश्च वो नमो
नमऽउगणाभ्यस्तृꣳहतीभ्यश्च वो नमो नमो गणेभ्यः ॥ २४ ॥
नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमो व्रातेभ्यो व्रातपति

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भ्यश्च्चवोनमोनमोगृत्सेभ्योगृत्सपतिभ्यश्च्चवोनमोनमो
विरूपेभ्योविश्श्व रूपेभ्यश्च्चवोनमोनमः सेनाभ्यः ॥ २५ ॥
नमः सेनाभ्यः सेनानिभ्यश्च्चवोनमोनमोरथिभ्योऽअरथेभ्य
श्च्चवोनमोनमः क्षत्तृभ्यः सङ्ग्रहीतृभ्यश्च्चवोनमोन
मोमहद्भ्योऽअर्भकेभ्यश्च्चवोनमः ॥ २६ ॥नमस्तक्षभ्यो
रथकारेभ्यश्च्चवो नमोनमः कुलालेभ्यः कर्म्मारेभ्यश्च्चवो
नमोनमो निषादेभ्यः पुञ्जिष्ठेभ्यश्च्चवोनमोनमः
श्श्वनिभ्योमृगयुभ्यश्च्च वोनमोनमः श्श्वभ्यः ॥ २७ ॥नमः
श्श्वभ्यः श्श्वपति भ्यश्च्चवोनमोनमोभवायचरुद्द्रायचनमः
शर्व्वायचपशुपतयेच नमोनीलग्ग्रीवायचशितिकण्ठा
यचनमः कपर्द्दिने ॥ २८ ॥ नमः कपर्द्दिने चव्युप्तकेशायच नमः
सहस्राक्षायचशतधन्वने च नमो गिरिशायाय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चशिपिविष्टायचनमोमीढुष्टमायचेषुमतेचनमो ह्रस्वाय ॥ २९ ॥
नमो ह्रस्वायचव्वामनायच नमो बृहते च व्वर्षीयसे च नमो
व्वृद्धायचसवृधेचनमो ऽग्र्यायचप्प्रथमायचनमऽआशवे ॥ ३० ॥
नमऽआशवेचाजिरायचनमः शीग्घ्यायचशीब्भ्याय चनमऽ
ऊर्म्यायचावस्वन्यायचनमोनादेयायचद्द्वीप्प्यायच ॥ ३१ ॥
नमो ज्ज्येष्ठायचकनिष्ठायचनमः पूर्व्वजायचापरजाय
चनमोमद्ध्यमायचापगल्भायचनमो जघन्यायच बुध्न्यायचनमः
सोब्भ्याय ॥ ३२ ॥ नमः सोब्भ्यायचप्प्रतिसर्य्यायचनमोया
म्म्यायचक्षेम्म्यायचनमः श्लोक्क्यायचावसान्यायचनमऽ
उर्व्वर्य्यायचखल्ल्यायचनमोव्वन्न्याय ॥ ३३ ॥ नमोव्वन्न्या
यचकक्ष्यायचनमः श्रवायचप्प्रतिश्रवायचनमऽ आशुषेणायचा
शुरथायचनमः शूरायचावभेदिनेचनमोबिल्मिने ॥ ३४ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नमोबिल्मिनेचकवचिनेचनमोव्वर्म्मिणेचव्वरूथिनेचनमः
श्श्रुतायचश्श्रुतसेनायचनमोदुन्दुभ्यायचाहनन्न्यायचनमो
धृष्ष्णवे ॥ ३५ ॥ नमोधृष्ष्णवेचप्प्रमृशायचनमोनिषङ्गिणे
चेषुधिमते चनमस्तीक्ष्णेषवेचायुधिनेचनमः स्वायुधाय
चसुधन्न्वनेच ॥ ३६ ॥ नमः स्रुत्यायचपथ्यायचनमः काट्यायच
नीप्प्यायचनमः कुल्यायचसरस्यायचनमोनादेयायचव्वैशन्ताय
चनमः कूप्प्याय ॥ ३७ ॥ नमः कूप्प्यायचावट्यायचनमोव्वीध्र्या
यचातप्प्यायचनमोमेघ्यायचव्विद्युत्यायचनमोव्वर्ष्यायचा
व्वर्ष्यायचनमोव्वात्त्याय ॥ ३८ ॥ नमोव्वात्त्यायचरेष्म्या
यचनमोव्वास्तव्व्यायचव्वास्तुपायचनमः सोमायचरुद्रायचन
मस्ताम्म्रायचारुणायचनमः शङ्गवे ॥ ३९ ॥ नमः शङ्गवेच
पशुपतयेचनमऽउग्ग्रायचभीमायचनमोऽग्ग्रेवधायचदूरेवधा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यंचनमोहन्त्रेचहनीयसेचनमोवृक्षेभ्योहरिकेशेभ्यो
नमस्ताराय ॥ ४० ॥ नमः शम्भवायचमयोभवायचनमः
शङ्करायचमयस्करायचनमः शिवायचशिवतरायच ॥ ४१ ॥
नमः पार्यायचावार्यायचनमः प्रतरणायचोत्तरणा
यचनमस्तीर्थ्यायचकूल्यायचनमः शष्प्यायचफेन्यायचनमः
सिकत्याय ॥ ४२ ॥ नमः सिकत्यायचप्रवाह्यायचनमः
किंशिलायचक्षयणायचनमः कपर्दिनेचपुलस्तयेचनमऽ
इरिण्यायचप्रपथ्यायचनमोव्रज्याय ॥ ४३ ॥ नमोव्रज्यायच
गोष्ठ्यायचनमस्तल्प्यायचगेह्यायचनमोहृदय्यायचनिवेष्प्या
यचनमः काट्यायचगह्वरेष्ठायचनमः शुष्क्याय ॥ ४४ ॥ नमः
शुष्क्यायचहरित्यायचनमः पांसव्यायचरजस्यायचनमो
लोप्यायचोलप्यायचनमऽऊर्व्यायचसूर्व्यायचनमः पर्णाय

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ ४५ ॥ नमः॑ पर्णाय॑ च पर्णश॒दाय॑ च॒ नमः॑ उद्गु॒रमा॑णाय चाभिघ्न॒ते
च॒ नमः॑ आखिद॒ते च॑ प्रखिद॒ते च॒ नमः॑ इषुकृद्भ्यो॑ धनु॒ष्कृद्भ्य॑
श्च वो॒ नम॒ो नमो॑ वः किरि॒केभ्यो॑ दे॒वाना॒ꣳ हृद॑येभ्यो॒ नमो॑
विचिन्व॒त्केभ्यो॒ नमो॑ विक्षिण॒त्केभ्यो॒ नमः॑ आनिर्ह॒
तेभ्य॑ः ॥ ४६ ॥ द्रापे॒ अन्ध॑सस्पते॒ दरि॑द्र॒ नील॑लोहित ॥ आ॒सां प्र॒
जानाम॒ेषां पशू॒नां मा भे॒र्मा रो॒ ङ्मो च॑ न॒ꣳ किञ्च॒नाम॑मत् ॥ ४७ ॥
इ॒मा रु॒द्राय॑ त॒वसे॑ कप॒र्दिने॑ क्ष॒यद्वी॑राय॒ प्रभ॑रामहे म॒तीः ॥ यथा॒शम
सद्द्वि॒पदे॒ चतु॑ष्पदे॒ विश्वं॒ पुष्टं॒ ग्रामे॑ अ॒स्मिन्न॑नातुरम् ॥ ४८ ॥
या ते॑ रुद्र शि॒वा त॒नूः शि॒वा वि॒श्वाहा॑ भेष॒जी ॥ शि॒वा रु॒तस्य॑
भेषजी॒ तया॑ नो मृड ज॒ीवसे॑ ॥ ४९ ॥ परि॑ नो॒ रु॒द्रस्य॑ हे॒तिर्वृ॑णक्तु
परि॑ त्वे॒षस्य॑ दुर्म॒तिर॑घा॒योः ॥ अव॑ स्थि॒रा म॒घव॑द्भ्यस्तनुष्व॒
मीढ्व॑स्तो॒काय॒ तन॑याय मृड ॥ ५० ॥ मीढु॑ष्टम॒ शिव॑तम शि॒वो न॑ः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुमनांभव ॥परमेव्वृक्षऽआयुंधन्निधायकृत्तिंव्वसांनऽआचंर
पिनांकम्बिब्भ्रदागंहि ॥ ५१ ॥ व्विकिंरिद्द्रव्विलोंहितनमंस्तेऽअ
स्तुभगवः ॥यास्तेंसहस्त्रंहेतयोऽन्न्यमस्म्मन्निवं पन्तुताः ॥ ५२ ॥
सहस्त्रांणिसहस्त्रशोबाह्वोस्तवं हेतयंः ॥ तासामीशांनोभगवः
पराचीनामुखां कृधि ॥ ५३ ॥ असंङ्ख्यातासहस्त्रांणियेरुद्द्रा
ऽअधिभूम्म्यांम् ॥तेषांᳪसहस्त्रयोजनेऽवधन्न्वांनि तन्न्मसि ॥ ५४ ॥
अस्म्मिन्न्महत्त्यंण्णर्वे ऽन्तरिंक्षेभवाऽअधिं ॥ तेषांᳪसहस्त्रयोजने
ऽवधन्न्वांनितन्न्मसि ॥ ५५ ॥ नीलंग्ग्रीवाः शितिकण्ठादिवः
रुद्द्राऽउपंश्रिताः ॥ तेषांᳪसहस्त्रयोजनेऽवधन्न्वां
नितन्न्मसि ॥ ५६ ॥ नीलंग्ग्रीवाः शितिकण्ठाः शर्व्वाऽअधः
क्षमाचराः ॥ तेषांᳪसहस्त्रयोजनेऽवधन्न्वांनितन्न्मसि ॥ ५७ ॥
येव्वृक्षेषुंशष्प्पिञ्जंरा नीलंग्ग्रीवाव्विलोंहिताः ॥ तेषांᳪसहस्त्र

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

योजनेऽवधन्वानितन्मसि ॥ ५८ ॥ येभूतानामधिपतयो
व्विशिखासः कपर्दिनः ॥ तेषाँसहस्रयोजनेऽवध
न्वानितन्मसि ॥ ५९ ॥ येपथाम्पथिरक्षयऽऐलबृदाऽआयुर्युधः ॥
तेषाँसहस्रयोजनेऽवधन्वानितन्मसि ॥ ६० ॥ येतीर्थानिप्प्र
चरन्तिसृकाहस्तानिषङ्गिणः ॥ तेषाँसहस्रयोजनेऽ
वधन्वानितन्मसि ॥ ६१ ॥ येन्नेषुव्विविद्ध्यन्तिपात्रेषु
पिबतोजनान् ॥ तेषाँसहस्र योजनेऽवधन्वानितन्मसि ॥ ६२ ॥
यऽएतावन्तश्च्चभूयाँसश्च्चदिशोरुद्द्रा व्वितस्थिरे ॥
तेषाँसहस्रयोजनेऽवधन्वानि तन्मसि ॥ ६३ ॥ नमोऽस्तुरुद्द्रे
ब्भ्योयेदिवियेषाँव्वर्षमिषवः ॥ तेब्भ्योदशप्प्राचीर्द्दश
दक्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः ॥ तेब्भ्योनमोऽअस्तुतेनो
ऽवन्तुतेनोमृडयन्तुते यन्द्विष्मोयश्च्चनोद्वेष्टितमेषाञ्जम्भेदद्ध्मः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ ६४ ॥ नमोँऽस्तु रुद्रेब्भ्यो येँऽन्तरिक्षे येषांव्वातऽइषंवः ॥
तेब्भ्योदशप्प्राचीर्द्दशंदक्षिणा दशंप्प्रतीचीर्द्दशोदींचीर्द्दशोर्द्ध्वाः ॥
तेब्भ्यो नमोँऽअस्तु ते नोँऽवन्तु ते नोँमृडयन्तु ते यन्द्विष्म्मो
यश्च्चंनोद्द्वेष्ट्टितमेंषाञ्जम्भेंदद्ध्मः ॥ ६५ ॥ नमोँऽस्तु रुद्रेब्भ्यो
येपृंथिव्व्यांय्येषामन्न मिषंवः ॥ तेब्भ्योदशप्प्राचीर्द्दशंदक्षिणादशं
प्प्रतीचीर्द्दशोदींचीर्द्दशोर्द्ध्वाः ॥ तेब्भ्योनमोँऽअस्तुतेनोँऽवन्तुतेनोँ
मृडयन्तुतेयन्द्विष्म्मोयश्च्चंनो द्द्वेष्ट्टितमेंषाञ्जम्भेंदद्ध्मः ॥ ६६ ॥

इति रुद्रे पञ्चमोऽध्यायः ॥ ५ ॥

अथ षष्ठोऽध्यायः

हरिः॑ ॐव्वयꣳसोमव्व्रतेतवमनंस्तनूषुबिब्भ्रंतः ॥ प्प्रजावंन्त
ꣳसचेमहि ॥ १ ॥ एषतेंरुद्द्रभागःसहस्वस्राऽम्बिंकयातञ्जुषस्व

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वाहैषतेरुद्द्रभागऽआखुस्तेपशुः ॥ २ ॥ अवरुद्द्रमदीमह्यव
वंदेवन्त्र्यम्बकम् ॥ यथांनोव्वस्यंसस्करद्यथांनश्श्रेयंसस्करद्यथांनो
व्व्यवसाययांत् ॥ ३ ॥ भेषजमंसिभेषजङ्गवेऽश्वांयपुरुंषाय
भेषजम् ॥ सुखम्मेषायंमेष्ष्यै ॥ ४ ॥ त्र्यंम्बकंय्यजामहेसुगन्धि
म्पुंष्टिवर्द्धनम् ॥ उर्व्वारुकमिंवबन्धंनान्मृत्योर्म्मुक्षीयमामृतांत् ॥
त्र्यंम्बकंय्यजामहेसुगन्धिम्पंतिवेदंनम् ॥ उर्व्वारुकमिंवबन्धंना
दितोमुंक्षीयमामुतंः ॥ ५ ॥ एतत्तेंरुद्द्राऽवसन्तेनंपरोमूजंवतो
ऽतींहि ॥ अवंततधन्न्वापिनांकावसःकृत्तिं वासाऽअहिंसन्नःशिवो
ऽतींहि ॥ ६ ॥ त्र्यायुषञ्जमदंग्ग्नेः कश्यपंस्यत्र्यायुषम् ॥
यद्देवेषुंत्र्यायुषन्तन्नोंऽ अस्तुत्र्यायुषम् ॥ ७ ॥ शिवोनामांसिस्वधिं
तिस्तेपितानमंस्तेऽअस्तुमामांहिंसीः ॥ निवंर्त्तयाम्म्यायुंषेऽन्नाद्द्यां
यप्प्रजनंनायरायस्प्पोषांयसुप्प्रजा स्त्वायंसुवीर्य्यांय ॥ ८ ॥

इति रुद्रे षष्ठोऽध्यायः ॥ ६ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ सप्तमोऽध्यायः

हरिः ॐ उग्ग्रश्च्चभीमश्च्चद्ध्वान्तश्च्चधुनिश्च्च ॥ सासह्वाँ
श्च्चाभियुग्ग्वाचव्विक्षिपꣳस्वाहा ॥ १ ॥ अग्ग्निꣳहृदयेनाशनिꣳ
हृदयाग्ग्रेण पशुपतिङ्कृत्स्नहृदयेनभवंय्यक्ना ॥ शर्व्वम्मतस्ना
भ्यामीशानम्मन्न्युनामहादेवमन्तꣳपर्शव्व्येनोग्ग्रन्देवंव्वनिष्ठुना
व्वसिष्ठहनुꣳशिङ्गीनिकोश्याभ्याम् ॥ २ ॥ उग्ग्रँल्लोहितेनमित्रꣳ
सौव्व्रत्त्येनरुद्द्रन्दौर्व्व्रत्त्येनेन्द्रम्प्रक्क्रीडेनमरुतोबलेनसाद्ध्या
न्प्रमुदा ॥ भवस्यकण्ठ्यꣳरुद्द्रस्यान्तꣳपार्श्व्यम्महादेवस्य
यकृच्छर्व्वस्यव्वनिष्ठुꣳपशुपतेꣳपुरीतत् ॥ ३ ॥ लोमभ्भ्यꣳ
स्वाहालोमभ्भ्यꣳस्वाहात्त्वचेस्वाहात्त्वचेस्वाहालोहिताय
स्वाहालोहितायस्वाहामेदोभ्भ्यꣳस्वाहामेदोभ्भ्यꣳस्वाहा ॥
माꣳसेभ्भ्यꣳस्वाहामाꣳसेभ्भ्यꣳस्वाहास्नावभ्भ्यꣳस्वाहा

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्नावंब्भ्यः स्वाहाऽस्त्थब्भ्यः स्वाहाऽस्त्थब्भ्यः स्वाहाम्मज्जब्भ्यः
स्वाहाम्मज्जब्भ्यः स्वाहा ॥ रेतसे स्वाहा पायवे स्वाहा ॥ ४ ॥
आयासायस्वाहाप्प्रायासायस्वाहासंव्यासायस्वाहाव्वियासाय
स्वाहोद्यासायस्वाहा ॥ शुचेस्वाहाशोचतेस्वाहाशोचमानाय
स्वाहाशोकायस्वाहा ॥ ५ ॥ तपसेस्वाहातप्प्यतेस्वाहातप्प्यमानाय
स्वाहातप्तायस्वाहाघर्म्मायस्वाहा ॥ निष्कृत्यैस्वाहाप्प्रायश्चित्त्यै
स्वाहाभेषजायस्वाहा ॥ ६ ॥ यमायस्वाहाऽन्तकायस्वाहामृत्यवे
स्वाहा ॥ ब्ब्रह्मणेस्वाहाब्ब्रह्महत्यायैस्वाहाव्विश्श्वेब्भ्योदेवेब्भ्यः
स्वाहाद्यावा पृथिवीब्भ्याᳬ स्वाहा ॥ ७ ॥

इति रुद्रे सप्तमोऽध्याय: ॥ ७ ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ अष्टमोऽध्यायः

हरिः॑ ॐ व्वाजश्च मे प्प्रसवश्च मे प्प्रयतिश्च मे प्प्रसितिश्च
मे धीतिश्च मे क्क्रतुश्च मे स्वरश्च मे श्श्लोकश्च मे श्श्रवश्च मे
श्श्रुतिश्च मे ज्ज्योतिश्च मे स्वश्च मे यज्ञेन कल्प्पन्ताम् ॥ १ ॥
प्प्राणश्च मेऽपानश्च मे व्व्यानश्च मेऽसुश्च मे चित्तञ्च मऽ
आधीतञ्च मे व्वाक्च मे मनश्च मे चक्षुश्च मे श्श्रोत्रञ्च मे दक्षश्च मे
बलञ्च मे यज्ञेन कल्प्पन्ताम् ॥ २ ॥ ओजश्च मे सहश्च मऽ
आत्मा च मे तनूश्च मे शर्म्म च मे व्वर्म्म च मेऽङ्गानि च मेऽस्थीनि च मे
परूᳪषि च मे शरीराणि च मऽआयुश्च मे जरा च मे यज्ञेन कल्प्पन्ताम्
॥ ३ ॥ ज्ज्यैष्ठ्यञ्च मऽआधिपत्त्यञ्च मे मन्न्युश्च मे भामश्च मे
ऽमश्च मेऽम्भश्च मे जेमा च मे महिमा च मे व्वरिमा च मे प्प्रथि
मा च मे व्वर्षिमा च मे द्द्राघिमा च मे व्वृद्धञ्च मे व्वृद्धिश्च मे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यज्ञेनकल्पन्ताम् ॥ ४ ॥ (न०) ॥ सत्त्यञ्चमेश्श्रद्धाचमेजगच्चमे
धनञ्चमेव्विश्श्वञ्चमेमहश्चमेक्क्रीडाचमेमोदश्चमेजातञ्च
मेजनिष्ष्यमाणञ्चमेसूक्तञ्चमेसुकृतञ्चमेयज्ञेनकल्पन्ताम् ॥ ५ ॥
ऋतञ्चमेऽमृतञ्चमेऽयक्ष्मञ्चमेऽनामयच्चमेजीवातुश्चमेदीर्घायु
त्वञ्चमेऽनमित्रञ्चमेऽभयञ्चमेसुखञ्चमेशयनञ्चमेसूषाश्चमे
सुदिनञ्चमेयज्ञेनकल्पन्ताम् ॥ ६ ॥ यन्ताचमेधर्त्ताचमेक्षेमश्चमे
धृतिश्चमेव्विश्श्वञ्चमेमहश्चमेसंव्विच्चमेज्ञात्रञ्चमेसूश्चमे
प्रसूश्चमेसीरञ्चमेलयश्चमेयज्ञेनकल्पन्ताम् ॥ ७ ॥ शञ्चमे
मयश्चमेप्प्रियञ्चमेऽनुकामश्चमेकामश्चमेसौमनसश्चमे
भगश्चमेद्रविणञ्चमेभद्रञ्चमेश्श्रेयश्चमेव्वसीयश्च
मेयशश्चमेयज्ञेनकल्पन्ताम् ॥ ८ ॥ (न०) ॥ ऊर्क्कच्चमे
सूनृताचमेपयश्चमेरसश्चमेघृतञ्चमेमधुचमेसग्ग्धिश्चमे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सपीतिश्च्चमेकृषिश्च्चमे वृष्टिश्च्चमेजैत्रञ्चमऔद्भिद्यञ्चमेयज्ञेन
कल्प्पन्ताम् ॥ ९ ॥ रयिश्च्चमेरायश्च्चमेपुष्टञ्चमेपुष्टिश्च्चमे
विभुचमेप्रभुचमे पूर्णञ्चमेपूर्णतरञ्चमेकुयवञ्चमेऽक्षितञ्चमे
ऽन्नञ्चमेऽक्षुच्चमेयज्ञेनकल्प्पन्ताम् ॥ १० ॥ वित्तञ्चमेवेद्यञ्चमे
भूतञ्चमेभविष्यच्चमेसुगञ्चमेसुपत्थ्यञ्चमऽऋद्धञ्चमऽ
ऋद्धिश्च्चमेक्लृप्तञ्चमेक्लृप्तिश्च्चमेमतिश्च्चमेसुमतिश्च्चमेयज्ञेन
कल्प्पन्ताम् ॥ ११ ॥ व्रीहयश्च्चमेयवाश्च्चमेमाषाश्च्चमेतिला
श्च्चमेमुद्गाश्च्चमेखल्वाश्च्चमेप्रियङ्गवश्च्चमेऽणवश्च्चमे
श्यामाकाश्च्चमेनीवाराश्च्चमेगोधूमाश्च्चमे मसूराश्च्चमेयज्ञेन
कल्प्पन्ताम् ॥ १२ ॥ (न०) अश्म्माचमेमृत्तिकाचमेगिरयश्च्चमे
पर्वताश्च्चमेसिकताश्च्चमेवनस्प्पतयश्च्चमेहिरण्ण्यञ्चमेऽ
यश्च्चमेश्यामञ्चमेलोहञ्चमेसीसञ्चमेत्रपुचमेयज्ञेनकल्प्पन्ताम्

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

॥ १३ ॥ अग्ग्निश्च्चमऽआपश्च्चमेव्वीरुधश्च्चमऽओषधयश्च्च
मेकृष्ट्टपच्च्याश्च्चमेऽकृष्ट्टपच्च्याश्च्चमेग्ग्राम्म्याश्च्चमेपशव
ऽआरण्ण्याश्च्चमेव्वित्तञ्च्चमेव्वित्तिश्च्चमेभूतञ्च्चमेभूतिश्च्चमे
यज्ञेनकल्प्पन्ताम् ॥ १४ ॥व्वसुचमेव्वसतिश्च्चमेकर्म्मचमेशक्ति
श्च्चमेऽर्थश्च्चमऽएमश्च्चमऽइत्याचमेगतिश्च्चमेयज्ञेन
कल्प्पन्ताम् ॥ १५ ॥ (न०) ॥ अग्ग्निश्च्चमऽइन्द्रश्च्चमेसोमश्च्चम
ऽइन्द्रश्च्चमेसविताचमऽइन्द्रश्च्चमेसरस्वतीचमऽइन्द्रश्च्च
मेपूषाचमऽइन्द्रश्च्चमेबृहस्प्पतिश्च्चमऽइन्द्रश्च्चमेयज्ञेन
कल्प्पन्ताम् ॥ १६ ॥ मित्रश्च्चमऽइन्द्रश्च्चमेव्वरुणश्च्चमऽ
इन्द्रश्च्चमेधाताचमऽइन्द्रश्च्चमेत्त्वष्टाचमऽइन्द्रश्च्चमे
मरुतश्च्चमऽइन्द्रश्च्चमेव्विश्श्वेचमेदेवाऽइन्द्रश्च्चमेयज्ञेन
कल्प्पन्ताम् ॥ १७ ॥ पृथिवीचमऽइन्द्रश्च्चमेऽन्तरिक्षञ्च्चमऽ

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इन्द्रश्च्च मे द्यौश्च्च मऽइन्द्रश्च्च मे समाश्च्च मऽइन्द्रश्च्च मे
नक्षत्त्राणि च मऽइन्द्रश्च्च मे दिशश्च्च मऽइन्द्रश्च्च मे यज्ञेन
कल्पन्ताम् ॥१८॥ (न०) ॥अꣳशुश्च्च मे रश्मिश्च्च मेऽदा
भ्यश्च्च मेऽधिपतिश्च्च मऽउपाꣳशुश्च्च मेऽन्तर्या
मश्च्च मऽऐन्द्रवायवश्च्च मे मैत्रावरुणश्च्च मऽआश्विनश्च्च मे
प्प्रतिप्रस्थानश्च्च मे शुक्रश्च्च मे मन्थी च मे यज्ञेन कल्पन्ताम् ॥ १९ ॥
आग्ग्रयणश्च्च मे व्वैश्वदेवश्च्च मे द्ध्रुवश्च्च मे व्वैश्वानरश्च्च म
ऽऐन्द्राग्ग्नश्च्च मे महाव्वैश्वदेवश्च्च मे मरुत्त्वतीयाश्च्च मे निष्क्के
वल्यश्च्च मे सावित्त्रश्च्च मे सारस्वतश्च्च मे पात्क्नीवतश्च्च मे
हारियोजनश्च्च मे यज्ञेन कल्पन्ताम् ॥ २० ॥ स्रुचश्च्च मे चमसाश्च्च
मे व्वायव्व्यानि च मे द्रोणकलशश्च्च मे ग्ग्रावाणश्च्च मेऽधिषवणे
च मे पूतभृच्च मऽआधवनीयश्च्च मे व्वेदिश्च्च मे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

बर्हिंश्च्चामेऽवभृथश्च्चामे स्वगाकारश्च्चामे यज्ञेनं
कल्प्पन्ताम् ॥ २१ ॥ (न०) ॥ अग्निश्च्चंमेघर्म्मश्च्चांमेऽ
र्क्कश्च्चांमेसूर्य्यश्च्चामे प्प्राणश्च्चांमेऽश्वमेधश्च्चांमेपृथिवीचमे
ऽदिंतिश्च्चामेदितिंश्च्चामेद्यौश्च्चांमेऽङ्गुलंयःशक्क्वंरयो
दिशंश्च्चामेयज्ञेनंकल्प्पन्ताम् ॥ २२ ॥ व्व्रतञ्चंमऽऋतवं
श्च्चमेतपंश्च्चमेसंव्वत्सरश्च्चंमेऽहोरात्रेऽऊर्व्वष्ठीवेबृहद्रथन्तरे
चंमेयज्ञेनंकल्प्पन्ताम् ॥ २३ ॥ (न०) ॥ एकांचमेतिस्रश्च्चांमे
तिस्रश्च्चांमेपञ्चंचमेपञ्चंचमेसप्तचंमेसप्तचंमेनवंचमेनवंचम
ऽएकांदशचमऽएकांदशचमेत्रयोंदशचमेत्रयोंदशचमे
पञ्चंदशचमेपञ्चंदशचमे सप्तदंशचमेसप्तदंशचमेनवंदशचमे
नवंदशचम ऽएकंविꣳशतिश्च्चमऽएकंविꣳशतिश्च्चमे त्रयोंवि
ꣳशतिश्च्चामेत्रयोंविꣳशतिश्च्चामेपञ्चंविꣳशतिश्च्चामे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पञ्चविꣳशतिश्चमे सप्तविꣳशतिश्चमे सप्तविꣳशतिश्चमे
नवविꣳशतिश्चमे नवविꣳशतिश्चमऽएकत्रिꣳशच्चम
ऽएकत्रिꣳशच्चमे त्रयस्त्रिꣳशच्चमे यज्ञेनकल्पन्ताम् ॥ २४ ॥
(न०) ॥ चतस्रश्चमेऽष्टौचमेऽष्टौचमे द्वादशचमे द्वादशचमे
षोडशचमे षोडशचमे विꣳशतिश्चमे विꣳशतिश्चमे
चतुर्विꣳशतिश्चमे चतुर्विꣳशतिश्चमेऽष्टाविꣳशतिश्चमेऽष्टाविꣳ
शतिश्चमे द्वात्रिꣳशच्चमे द्वात्रिꣳशच्चमे षट्त्रिꣳशच्चमे
षट्त्रिꣳशच्चमे चत्वारिꣳशच्चमे चत्वारिꣳशच्चमे
चतुश्चत्वारिꣳशच्चमे चतुश्चत्वारिꣳशच्चमेऽष्टाचत्वारिꣳ
शच्चमे यज्ञेनकल्पन्ताम् ॥ २५ ॥ (न०) ॥ त्र्यविश्चमे
त्र्यवीचमे दित्यवाट् चमे दित्यौहीचमे पञ्चाविश्चमे
पञ्चावीचमे त्रिवत्सश्चमे त्रिवत्साचमे तुर्य्यवाट्चमे तुर्य्यौहीचमे

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यज्ञेनकल्पन्ताम् ॥ २६ ॥ पष्ठुवाट् चमेपष्ठौहीचमऽउक्षाचमे
व्वशाचमऽऋषभश्च्चमे व्वेहच्चमेऽनड्वाँश्च्चमेधेनुश्च्चमेयज्ञेन
कल्पन्ताम् ॥ २७ ॥ (न०) ॥ व्वाजायस्वाहाप्प्रसवायस्वाहा
ऽपिजायस्वाहाक्क्रतवेस्वाहाव्वसवेस्वाहाऽहर्प्पतयेस्वाहा
ह्नेमुग्धायस्वाहामुग्धायव्वैनꣳशिनायस्वाहाव्विनꣳशिन
ऽआन्त्यायनायस्वाहान्त्यायभौवनायस्वाहाभुवनस्यपतये
स्वाहाधिपतयेस्वाहाप्प्रजापतयेस्वाहा ॥ इयन्तेराण्मित्त्राय
यन्तासियमनऽऊर्ज्जेत्वाव्वृष्ट्यैत्वाप्प्रजानान्त्वाधिपत्त्याय ॥ २८ ॥
आयुर्य्यज्ञेनकल्प्पताम्प्राणोयज्ञेनकल्प्पताञ्चक्षुर्य्यज्ञेन कल्प्पताꣳ
श्श्रोत्रंयज्ञेन कल्प्पताव्वाग्यज्ञेनकल्प्पताम्मनोयज्ञेनकल्प्पता
मात्माऽयज्ञेनकल्प्पताम्ब्रह्मायज्ञेन कल्प्पताञ्ज्योतिर्य्यज्ञेनकल्प्पता
ꣳस्वर्य्यज्ञेनकल्प्पताम्पृष्ठꣳयज्ञेनकल्प्पताय्यज्ञोयज्ञेनकल्प्पताम् ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्तोमंश्च्च यजुंश्च्च ऽऋक्च्च सामंचबृहच्चांरथन्तरञ्चं ॥ स्वंर्द्देवा ऽअगन्मामृतांऽअभूमप्प्रजापतेंः प्प्रजाऽअंभूम व्वेट्स्वाहां ॥ २९ ॥

इत्यष्टमोऽध्यायः ॥ ८ ॥

अथ शान्त्यध्यायः

हरिंः ॐ ऋचंव्वाचम्प्रपंद्येमनोयजुंः प्प्रपंद्येसामंप्प्राण म्प्रपंद्ये चक्षुंः श्श्रोत्रम्प्रपंद्ये ॥ व्वागोजंःसहौजोमयिं प्प्राणापानौ ॥ १ ॥ यन्मेंछिद्द्रञ्चक्षुंषोहृदंयस्यमनंसोव्वातिं तृण्णम्बृहस्प्पतिंर्म्मेतद्दंधातु ॥शन्नोंभवतु भुवंनस्ययस्प्पतिंः ॥ २ ॥ भूर्ब्भुवः स्वः । तत्संवितुर्व्वरेंण्यम्भर्गोंदेवस्यंधीमहि ॥ धियोयोनंःप्प्रचोदयांत् ॥ ३ ॥ कयांनश्चित्रऽआभुंवदूती सदावृंधःसखां ॥ कयाशचिंष्ठयाव्वृता ॥ ४ ॥ कस्त्वांसत्यो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मदानाम्मंहिष्ठोमत्सदन्धसः ।दृढाचिदारुजेव्वसु ॥ ५ ॥
अभीषुणःसखीनामविताजरितृणाम् ॥ शतम्भवास्यूतिभिः ॥ ६ ॥
कयात्वन्नऽऊत्याभिप्प्रमन्दसेव्वृषन् ॥ कयास्तोतृब्भ्य
ऽआभर ॥ ७ ॥ इन्द्रोव्विश्श्वस्यराजति ॥ शन्नोऽअस्तुद्द्विपदेश
ञ्चतुष्प्पदे ॥ ८ ॥ शन्नोमित्रःशंव्वरुणःशन्नोभवत्वर्य्यमा ॥
शन्नऽइन्द्रो बृहस्प्पतिःशन्नोव्विष्णुरुरुक्क्रमः ॥ ९ ॥ शन्नोव्वातः
पवताᳬशन्नस्तपतुसूर्य्यः ॥ शन्नःकनिक्क्रदद्देवःपर्ज्जन्न्योऽ
अभिवर्षतु ॥ १० ॥ अहानिशम्भवन्तुनःशᳬरात्रीःप्प्रतिधीयताम् ॥
शन्नऽइन्द्राग्ग्नीभवतामवोभिःशन्नऽइन्द्रावरुणारातहव्व्या ॥ शन्नऽ
इन्द्रापूषणाव्वाजसातौशमिन्द्रासोमासुवितायशंय्योः ॥ ११ ॥
शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंय्योर
भिस्रवन्तुनः ॥ १२ ॥ स्योना पृथिविनोभवानृक्षरानिवेशनी ॥

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यच्छानꣳशर्म्म सप्प्रथाꣳ ॥ १३ ॥ आपोहिष्ठामयोभुवस्तान
ऽऊर्जेदधातन ॥ महेरणायचक्षसे ॥ १४ ॥ योवꣳशिव
तमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ १५ ॥ तस्म्मा
ऽअरङ्गमामवोयस्यक्षयायजिन्न्वथ ॥ आपोजनयथाचनꣳ ॥ १६ ॥
द्यौःशान्ति रन्तरिक्षꣳशान्तिः पृथिवीशान्तिरापꣳशान्तिरो
षधयꣳशान्तिः ॥ व्वनस्प्पतयꣳशान्तिर्व्विश्वेदेवाःशान्ति
र्ब्रह्मशान्तिꣳसर्व्वꣳशान्तिꣳशान्तिरेवशान्तिꣳसामाशान्ति
रेधि ॥ १७ ॥ दृतेदृꣳहमामित्रस्यमाचक्षुषासर्व्वाणिभूतानि
समीक्षन्ताम् ॥ मित्रस्याहञ्चक्षुषासर्व्वाणिभूतानिसमीक्षे ॥
मित्रस्यचक्षुषासमीक्षामहे ॥ १८ ॥ दृतेदृꣳहमा । ज्ज्योक्क्तेसन्दृशि
जीव्व्यासञ्ज्योक्क्तेसन्दृशिजीव्व्यासम् ॥ १९ ॥ नमस्ते
हरसेशोचिषेनमस्ते ऽअस्त्वर्च्चिषे ॥ अन्न्याँस्ते ऽअस्म्मत्तपन्तुहेतयः

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पावकोऽअस्मभ्यꣳ शिवोभव ॥ २० ॥ नमस्तेऽअस्तुविद्युते
नमस्तेस्तनयित्नवे ॥ नमस्तेभगवन्नस्तुयतꣳ स्वः समीहसे ॥ २१ ॥
यतोयतꣳ समीहसेततोनोऽअभयङ्कुरु ॥ शन्नः कुरुप्रजाभ्योऽ
भयन्नꣳ पशुभ्यः ॥ २२ ॥ सुमित्रियानऽआपऽओषधयꣳ
सन्तुदुर्म्मित्रियास्तस्मैसन्तुयोऽस्मान्द्वेष्टियञ्चवयन्द्विष्मः ॥ २३ ॥
तच्चक्षुर्देवहितम्पुरस्ताच्छुक्रमुच्चरत् ॥ पश्येमशरदः शतञ्जीवेम
शरदः शतꣳ शृणुयामशरदः शतम्प्रब्रवाम शरदः शतमदीनाꣳ
स्यामशरदः शतम्भूयश्चशरदः शतात् ॥ २४ ॥

इति शान्त्यध्यायः ।

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ स्वस्तिप्रार्थनामन्त्राः ।

हरिः ॐ स्वस्तिन ऽइन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः ॥ स्वस्तिन स्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥ १ ॥ ॐ पयः पृथिव्यां पय ऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः ॥ पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ २ ॥ ॐ विष्णो रराटमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोऽसि ॥ वैष्णवमसि विष्णवे त्वा ॥ ३ ॥ ॐ अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवताऽऽदित्या देवता मरुतो देवता विश्वे देवा देवता बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता ॥ ४ ॥

ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः ॥ भवे भवे नातिभवे भवस्व मां भवोद्भवाय नमः ॥ ५ ॥ वामदेवाय नमो

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः
कलंविकरणाय नमो बलंविकरणाय नमो बलाय नमो
बलंप्रमथनाय नमः सर्वभूतदमनाय नमों मनोन्मंनाय नमंः ॥ ६ ॥
अघोरेंभ्यो ऽथघोरेंभ्यो घोरघोरंतरेभ्यः ॥ सर्वेभ्यः सर्व शर्वेभ्यो
नमंस्ते ऽअस्तु रुद्ररूंपेभ्यः ॥ ७ ॥ तत्पुरुंषाय विद्महें महादेवायं
धीमहि ॥ तन्नो रुद्रः प्रचोदयांत् ॥ ८ ॥ ईशानः सर्वविद्यानामीश्वरः
सर्वभूतानाम् ॥ ब्रह्माधिंपतिर्ब्रह्मणो ऽधिंपतिर्ब्रह्मां शिवो में ऽअस्तु
सदा शिवोऽम् ॥ ९ ॥

ॐ शिवोनामांसिस्वधिंतिस्तेपितानमंस्ते ऽअस्तुमामांहिंसीः ॥
निवंर्त्तयाम्म्यायुंषे ऽन्नाद्यांयप्प्रजननांयरायस्प्पोषांय
सुप्रजास्त्वायंसुवीर्य्यांय ॥ १० ॥
ॐ विश्वांनिदेवसवितर्दुरितानिपरांसुव ॥ यद्भद्रन्तन्न ऽ ८५

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आसुव ॥ ११ ॥ ॐ द्यौः शान्ति रन्तरिक्षꣳ शान्तिः पृथिवीशान्ति
रापꣳ शान्ति रोषधयꣳ शान्तिः ॥ व्वनस्पतयꣳ शान्तिर्व्विश्वे
देवाः शान्तिर्ब्ब्रह्म शान्तिꣳ सर्व्वꣳ शान्तिꣳ शान्तिरेवशान्तिꣳ
सामाशान्ति रेधि ॥ १२ ॥ ॐ सर्व्वेषां वा एष व्वेदानाᳪ रसो
यत्साम सर्वेषामेवैन मेतद्वेदानाᳪ रसेनाभिषिञ्चति ॥ १३ ॥

इति स्वस्तिप्रार्थनामन्त्राः

ॐ शान्तिः शान्तिः शान्तिः

अनेनश्रीरुद्राभिषेककर्मणाश्रीभवानी शङ्कर महारुद्रः प्रीयतां न मम ।

ॐ साम्ब सदाशिवार्पणमस्तु ।

इति रुद्राष्टाध्यायी समाप्ता ।

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Santipur

Dihira

Bafka

Assam

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

Kirtikant Sharma Collection, Najafgarh